# Vyasaproktam Shiva Stotram

# વ્યાસપ્રોક્તં શિવસ્તોત્રમ્

## Document Information

Text title : Vyasaproktam Shiva Stotram

File name : vyAsaproktaMshivastotram.itx

Category : shiva, mahAbhArata, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : mahAbhArata | droNaparva | adhyAya 173/20-39||

Latest update : November 15, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 15, 2025

*sanskritdocuments.org*

# વ્યાસપ્રોક્તં શિવસ્તોત્રમ્

રુદ્રાય શિતિકણ્ઠાય કનિષ્ઠાય સુવર્ચસે ॥ ૨૦॥

કપર્દિને કરાલાય હર્યક્ષ્ણે વરદાય ચ ।
યામ્યાયાવ્યક્તકેશાય સદ્વૃત્તે શઙ્કરાય ચ ॥ ૨૧॥

કામ્યાય હરિનેત્રાય સ્થાણવે પુરુષાય ચ ।
હરિકેશાય મુણ્ડાય કૃશાયોત્તરણાય ચ ॥ ૨૨॥

ભાસ્કરાય સુતીર્થાય દેવદેવાય રંહસે ।
બહુરૂપાય શર્વાય પ્રિયાય પ્રિયવાસસે ॥ ૨૩॥

ઉષ્ણીષિણે સુવક્ત્રાય સહસ્રાક્ષાય મીઢુષે ।
ગિરિશાય પ્રશાન્તાય પતયે ચીરવાસસે ॥ ૨૪॥

હિરણ્યબાહવે ચૈવ ઉગ્રાય પતયે દિશામ્ ।
પર્જન્યપતયે ચૈવ ભૂતાનાં પતયે નમઃ ॥ ૨૫॥

વૃક્ષાણાં પતયે ચૈવ અપાં ચ પતયે તથા ।
વૃક્ષૈરાવૃતકાયાય સેનાન્યે મધ્યમાય ચ ॥ ૨૬॥

સ્રુવહસ્તાય દેવાય ધન્વિને ભાર્ગવાય ચ ।
બહુરૂપાય વિશ્વસ્ય પતયે ચીરવાસસે ॥ ૨૭॥

સહસ્રશિરસે ચૈવ સહસ્રનયનાય ચ ।
સહસ્રબાહવે ચૈવ સહસ્રચરણાય ચ ॥ ૨૮॥

શરણં પ્રાપ્ય કૌન્તેય વરદં ભુવનેશ્વરમ્ ।
ઉમાપતિં વિરૂપાક્ષં દક્ષયજ્ઞનિબર્હણમ્ ।
પ્રજાનાં પતિમવ્યગ્રં ભૂતાનાં પતિમવ્યયમ્ ॥ ૨૯॥

કપર્દિનં વૃષાવર્તં વૃષનાભં વૃષધ્વજમ્ ।
વૃષદર્પં વૃષપતિં વૃષશૃઙ્ગં વૃષર્ષભમ્ ॥ ૩૦॥

વૃષાઙ્કં વૃષભોદારં વૃષભં વૃષભેક્ષણમ્ ।
વૃષાયુધં વૃષશરં વૃષભૂતં મહેશ્વરમ્ ॥ ૩૧॥

મહોદરં મહાકાયં દ્વીપિચર્મનિવાસિનમ્ ।
લોકેશં વરદં મુણ્ડં બ્રહ્મણ્યં બ્રાહ્મણપ્રિયમ્ ॥ ૩૨॥

ત્રિશૂલપાણિં વરદં ખડ્ગચર્મધરં પ્રભુમ્ ।
પિનાકિનં ખણ્ડપરશું લોકાનાં પતિમીશ્વરમ્ ।
પ્રપદ્યે શરણં દેવં શરણ્યં ચીરવાસસમ્ ॥ ૩૩॥

નમસ્તસ્મૈ સુરેશાય યસ્ય વૈશ્રવણઃ સખા ।
સુવાસસે નમો નિત્યં સુવ્રતાય સુધન્વિને ॥ ૩૪॥

સ્રુવહસ્તાય દેવાય સુખધન્વાય ધન્વિને ।
ધન્વન્તરાય ધનુષે ધન્વાચાર્યાય ધન્વિને ॥ ૩૫॥

ઉગ્રાયુધાય દેવાય નમઃ સુરવરાય ચ ।
નમોઽસ્તુ બહુરૂપાય નમશ્ચ બહુધન્વિને ॥ ૩૬॥

નમોઽસ્તુ સ્થાણવે નિત્યં સુવ્રતાય સુધન્વિને ।
નમોઽસ્તુ ત્રિપુરઘ્નાય ભગઘ્નાય ચ વૈ નમઃ ॥ ૩૭॥

વનસ્પતીનાં પતયે નરાણાં પતયે નમઃ ।
અપાં ચ પતયે નિત્યં યજ્ઞાનાં પતયે નમઃ ॥ ૩૮॥

પૂષ્ણો દન્તવિનાશાય ત્ર્યક્ષાય વરદાય ચ ।
નીલકણ્ઠાય પિઙ્ગાય સ્વર્ણકેશાય વૈ નમઃ ॥ ૩૯॥

ઇતિ મહાભારતે દ્રોણપર્વણિ ૧૭૩ અધ્યાયાન્તર્ગતં
અર્જુનાય વ્યાસપ્રોક્તં શિવસ્તોત્રં સમ્પૂર્ણમ્ ।

મહાભારત । દ્રોણપર્વ । અધ્યાય ૧૭૩/૨૦-૩૯॥

mahAbhArata . droNaparva . adhyAya 173/20-39..

Proofread by PSA Easwaran

*Vyasaproktam Shiva Stotram*

pdf was typeset on November 15, 2025

Please send corrections to *sanskrit@cheerful.com*